क्वचिद्वृक्षकबन्धन्तु कुर्य्याद्बन्धं सहस्रशः ।
मृगपक्षिसमूहस्य रुतज्ञानञ्च विन्दति ॥
ब्रह्माद्यं स्थावरान्तञ्च हस्तामलकवद्भवेत् ।
बहुनात्र किमुक्तेन विज्ञानानि सहस्रशः ॥
उत्पद्यन्ते मुनिश्रेष्ठा मुनेस्तस्य महात्मनः ।
अभ्यासेनैव विज्ञानं विशुद्धञ्च स्थिरं भवेत् ॥
तेजोरूपाणि सर्व्वाणि सर्व्वं पश्यति योगवित् ।
देवबिम्बान्यनेकानि विमानानि सहस्रशः ॥
पश्यति ब्रह्मविष्ण्विन्द्रयमाग्निवरुणादिकान् ।
ग्रहनक्षत्रताराश्च भुवनानि सहस्रशः ॥
पातालतलसंस्थाश्च समाधिस्थः स पश्यति ।
आत्मविद्याप्रदीपेन स्वस्थेनाचलनेन तु ॥
प्रसादामृतपूर्णेन सत्त्वपात्रस्थितेन तु ।
तमो निहत्य पुरुषः पश्यति ह्यात्मनीश्वरम् ॥
तस्य प्रसादाद्धर्म्मश्च ऐश्वर्य्यं ज्ञानमेव च ।
वैराग्यमपवर्गश्च नात्र कार्य्या विचारणा ॥
न शक्यो विस्तराद्वक्तुं वर्षाणामयुतैरपि ।
योगे पाशुपते निष्ठा स्थातव्यञ्च मुनीश्वराः ! ॥"
इति लिङ्गपुराणे ९ अध्यायः ॥ )

अथ त्रिविधयोगः ।
श्रीभगवानुवाच ।
"योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।
ज्ञानं कर्म्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥
निर्व्विण्णानां ज्ञानयोगो न्यासिनामिह कर्म्मसु ।
तेष्वनिर्व्विण्णचित्तानां कर्म्मयोगश्च कामिनाम् ॥
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥
तावत् कर्म्माणि कुर्व्वीत न निर्व्विद्येत यावता ।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥
स्वधर्म्मस्थो यजन् यज्ञैरनाशीः काम उद्धव ! ।
न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ॥
अस्मिँल्लोके वर्त्तमानः स्वधर्म्मस्थोऽनघः शुचिः ।
ज्ञानं विशुद्धमाप्नोति मद्भक्तिञ्च यदृच्छया ॥"
इति श्रीभागवते । ११ । २० । ६—११ ॥ * ॥

सांख्ययोगः २ कर्म्मयोगः ३ ज्ञानकर्म्मन्यासयोगः ४ सन्न्यासयोगः ५ ध्यानयोगः ६ विज्ञानयोगः ७ ब्रह्मयोगः ८ राजगुह्ययोगः ९ विभूतियोगः १० भक्तियोगः ११ प्रकृतिपुरुषविवेकयोगः १२ गुणत्रययोगः १३ पुरुषोत्तमयोगः १४ आचारविवेकयोगः १५ मोक्षयोगः १६ एते योगा एतेष्वध्यायेषु भगवद्गीतायां द्रष्टव्याः ॥ * ॥ ( कलौ योगसिद्धिर्नास्ति । यदुक्तं काशीखण्डे । ३२ अध्याये ।
"न सिध्यति कलौ योगो न सिध्यति कलौ तपः ॥
तथा च तत्रैव ४२ अध्याये ।
"चञ्चलेन्द्रियवृत्तिः स्यात् कलिकल्मषजृम्भणात् ।
अल्पायुः स्यात्तथा नृणां क्वेह योगमहोदयः ॥")

**योगक्षेमं**, क्ली, (योगश्च क्षेमश्च तयोः समाहारः ।) अनागतानयनागतरक्षणे । यथा मनुः ।
"दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे ।
योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात् ॥"
बृहदङ्गिराः ।
"अनागतस्य चानेता आगतस्य च रक्षकः ।
रात्रावपि यदान्योऽस्ति तदा स्वामी न दोषभाक् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
( तथा च गीतायाम् । ९ । २२ ।
"अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥"
"योगोऽप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं वहामि ।" इति शङ्कराचार्य्यः ॥ "योगं धनादिलाभं क्षेमञ्च तत्पालनं मोक्षं वा तैरप्रार्थितमपि अहमेव वहामि प्रापयामि ।" इति श्रीधरस्वामी ॥ योगश्च क्षेमश्च इतीतरेतरद्वन्द्वे पुंलिङ्गद्विवचनप्रयोगो भवति ।) यथा,—
"योगक्षेमकरं कृत्वा सीताया लक्ष्मणं ततः ।
मृगस्यानुपदी रामो जगाम गजविक्रमः ॥"
इति भट्टिकाव्ये । ५ । ५० ॥
"फलपुष्पादेरलब्धस्य साधनं योगः शरीरादेर्लब्धस्य पालनं क्षेमः ।" इति तट्टीकायां भरतः ॥ "योगक्षेमौ शरीरस्थितिपालने ।" इति तत्रैव जयमङ्गलः ॥

**योगचरः**, पुं, (योगेषु चरतीति । चर + "चरेष्टः ।" ३ । २ । १६ । इति टः ।) हनूमान् । इति शब्दरत्नावली ॥

**योगजं**, क्ली, (योगात् जायते इति । जन् + डः ।) अगुरु । इति भावप्रकाशः ॥ योगजाते, त्रि ॥

**योगजः**, पुं, (योगेभ्यो जायते इति । जन् + डः ।) अलौकिकसन्निकर्षविशेषः । स च युक्तयुञ्जानभेदतो द्विविधः । यथा,—
"अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥
आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्म्मबोधसामग्र्यपेक्ष्यते ॥
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः ॥"
इति भाषापरिच्छेदे । ६३—६६ ॥ * ॥
"योगज इति । योगाभ्यासजनितधर्म्मविशेषः । श्रुतिपुराणादिप्रमाणक इत्यर्थः । युक्तेति । युक्तयुञ्जानरूपयोगिद्वैविध्यात् धर्म्मस्य द्वैविध्यमिति भावः । युक्तस्येति । योगाभ्यासावगता वशीकृत-समाधि-समासादित-विविधसिद्धियुक्त इत्युच्यते । अयमेव विशिष्टयोगवत्त्वात् युक्त इत्युच्यते । सर्व्वदेति । चिन्तासहकारं विनेत्यर्थः । भानं सर्व्वविषयाणां प्रत्यक्षम् । अपरो युञ्जानः । विषयव्यावृत्ता मानससमाधिस्थः अयञ्च युञ्जान उच्यते । चिन्ता ध्यानं तदेव कारणं तत्सहकारात् स्थूलसूक्ष्मव्यवहितविप्रकृष्टार्थान् मनः प्रत्यक्षीकरोतीत्यर्थः ।" इति सिद्धान्तमुक्तावली ॥

**योगदानं**, क्ली, ( योगेन दानम् । ) छलेन दानम् । यथा,—
"योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाप्युपधिं पश्येत्तत् सर्व्वं विनिवर्त्तयेत् ॥"
इति मानवे ८ अध्यायः ॥
"योगाधमनेति । योगशब्दश्छलवाची छलेन ये बन्धकविक्रयदानप्रतिग्रहाः क्रियन्ते न तत्त्वतोऽन्यत्रापि निःक्षेपादौ यत्र छद्म जानीयात् वस्तुतो निक्षेपादि न कृतं तत् सर्व्वं निवर्त्तयेत् ।" इति तट्टीकायां कुल्लूकभट्टः ॥

**योगनाविकः**, पुं, मत्स्यविशेषः । तत्पर्य्यायः ! गर्गाटः २ । इति हारावली ॥

**योगनिद्रा**, स्त्री, ( योगश्चित्तवृत्तिनिरोधलक्षणः समाधिस्तद्रूपा निद्रा । ) दुर्गा । यथा,—
"या निम्नान्तःस्थलाधस्था जगद्दण्डकपालतः ।
विभज्य पुरुषं याति योगनिद्रेति सोच्यते ॥"
इति कालिकापुराणे ६ अध्यायः ॥
(अपि च मार्कण्डेये देवीमाहात्म्ये । ८१ । ४९ ।
"योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् प्रभुः ॥"
योगेन सन्नहनोपायादिना साध्या निद्रा । वीराणां निद्रा । यथा, कामन्दकीयनीतिसारे । १५ । ४४ ।
"मार्गे च दुर्गे विनिविष्टसैन्यो
विधाय रक्षां विधिवद्विधिज्ञः ।
सन्नद्धपार्श्वस्थितवीरयोधः
सेवेत साध्वीं सुखयोगनिद्राम् ॥" )

**योगपट्टं**, क्ली, ( योगस्य पट्टं वसनविशेषः । योगार्थं पट्टमिति वा ।) यद्बन्धेन पृष्ठजानुबन्धनं भवति तत् । यथा,—
"पादुके योगपट्टञ्च तर्ज्जन्यां रौप्यधारणम् ।
न जीवत्पितृकः कुर्य्यात् ज्येष्ठे भ्रातरि जीवति ॥"
तल्लक्षणं यथा,—
"पृष्ठजान्वोः समायोगे वस्त्रं वलयवद्दृढम् ।
परिवेष्ट्य यदूर्द्ध्वमुत्तिष्ठेत्तद्योगपट्टकम् ॥"
इति पाद्मे कार्त्तिकमाहात्म्ये २ अध्यायः ॥
(योगपदकम् । उत्तरीयविशेषः । यथा, याज्ञवल्क्यः ।
"अभावे धौतवस्त्राणां शाणक्षौमाविकानि च ।
कुतपो योगपट्टं वा द्विर्व्वासा येन वा भवेत् ॥")
इत्याह्निकतत्त्वम् ॥)

**योगपदकं**, क्ली, ( योगस्य पदकम् । ) पूजादौ धार्य्योत्तरीयविशेषः । योगपाटा इति भाषा ॥ यथा,—
"त्रिविधं योगपदकमाद्यं व्याघ्राजिनोद्भवम् ।
द्वितीयं मृगचर्म्माढ्यं तृतीयं तन्तुनिर्म्मितम् ।
चतुर्म्मात्रप्रविस्तारं दैर्घ्ये यज्ञसूत्रवत् ॥
चतुर्म्मात्रं चतुरङ्गुलमात्रम् ।" इति वीरमित्रोदयधृतसिद्धान्तशेखरः ॥

**योगपीठं**, क्ली, ( योगस्य योगार्थं वा पीठमासनम् । ) देवानां योगासनम् । यथा,—